# जयतात् पुस्तकं लोके ....

देहलीस्थेन केन्द्रीयसंस्कृतविश्वविद्यालयेन समायोजिते विश्वपुस्तक-प्रतिलिप्यधिकारदिवससमारोहे (२३/०४/२४) कुलपतिप्रमुखाः अधिकारिणः शोधच्छात्राश्च सोत्साहं भागमगृह्णन्। सर्वपरिसरीयाः प्राध्यापकाः ग्रन्थालयाधिकारिणः अन्ये शैक्षणिकप्रमुखाः प्रत्यक्षं परोक्षं चोपस्थिताः आसन्।

राष्ट्रियविधिविश्वविद्यालयस्य ग्रन्थालयाध्यक्षा डा. प्रियारायवर्या विशिष्टातिथिरूपेण अस्मिन् समारोहे भागं गृहीत्वा अवोचत् यत्- पुस्तकानि मानवजीवनं प्रभावयति इति । बौद्धिकसम्पत् इत्युक्ते किम् ? प्रतिलिप्यधिकारो नाम कः? पुस्तकानां मुद्रणावसरे प्रकाशनावसरे च अवधेयाः अंशाः के? इत्यादिषु विषयेषु सुष्ठु प्रत्यपादयत्। विशिष्य अन्तर्जालेभ्यः विविधस्रोतसां स्वीकरणावसरे कीदृशी जागरूकता भवेत् इति सोदाहरणं प्रत्यपादयत्।




समारोहे आयुष्मता विनयशुक्लेन वैदिकमङ्गलाचरणं कृतम् । स्वागतभाषणं प्रकाशनानुभागस्य निदेशकेन प्रो. काशीनाथ न्यौपानेवर्येण ससन्दर्भं शास्त्रोदाहरणैः सह च कृतम्। प्रास्ताविकभाषणे ग्रन्थालयाध्यक्षः डा. पूरणमलगुप्तावर्यः समारोहायोजनस्य उद्देश्यानि अवदत् । पुस्तकेऽपि भवेत्प्रीतिः , जयतात् पुस्तकं लोके इत्येवं विविधैः श्लोकैः सारस्वतभाषणं प्रो. बनमाली बिस्वालवर्येण विहितम्। सर्वैः सदस्यैः पुस्तकदिवसम् उपलक्ष्य शपथग्रहणं सभामुखं विहितम्।

समारोहस्य अध्यक्षैः प्रो. श्रीनिवासवरखेडीवर्यैः उक्तं यत् स्वाधिकारात् प्रमत्तः इति श्लोकवाक्यं प्रसिद्धम् । वयं संस्कृतज्ञाः स्वाधिकारान् कर्तव्यानि च सुष्ठु अवगच्छामः। किञ्च प्रतिलिप्यधिकारचिन्तनं पाश्चात्यानाम् । सर्वहितचिन्तनं भारतीयानाम्। अतः वयं विधिबद्धनियमान् अपि पालयामः समाजहितमपि कुर्मः एवेति। समारोहस्य सुचारुरूपेण सञ्चालनं संयुक्तनिदेशकेन डा. पवनव्यासवर्येण विहितम्। धन्यवादसमर्पणं डा. गणेशपण्डितवर्येण

कृतम्। कुलसचिवः प्रो. रा.गा. मुरलीकृष्णवर्यः कार्यक्रमनिदेशकः प्रो. मधुकेश्वरभट्टवर्यः विश्वविद्यालयप्रकाशनस्य संयुक्तनिदेशकः प्रो. सुज्ञान कुमार माहान्तिवर्यः अन्ये अधिकारिणः शिक्षकाः च अत्र साक्षिणः अभवन्। सर्वे शोधच्छात्राः प्रश्नोत्तरसंवादैः कार्यक्रमस्य शोभामवर्धयन् । शान्तिमन्त्रेण कार्यक्रमः सम्पन्नः।







**प्रतिवेदनम् -**

डा.गणेशपण्डितः
संयुक्तनिदेशकः
शैक्षणिकपरियोजनाः
प्रकाशनानुभागः, के. सं. वि.

**सहयोगः -**

श्री मनोज मिश्रः
श्री विनय शुक्लः
श्री श्रीशसमीरः